स्मृते नवा स्मरामीत्यनुव्यवसायः तथा तत्रैव विशेषावभासस्य प्रतिरोधान्न शुक्तिग्रहणेऽपि तदीयनीलपृष्ठादिविशेषग्रहः। तथा च इदमंशे ग्रहणं रजतांशे स्मरणमुभयात्मकमपि ज्ञानमविविक्ततया प्रवर्त्तकमिति तादृग्ग्रहणस्मरणाभ्यां रजतार्थी पुरोवर्त्तिनि प्रवर्त्तते इति चेन्न ग्रहणस्मरणे किं द्वे अपि प्रवर्त्तके आहोस्विदेकैकम् आद्येऽपि किं संभूय प्रवर्त्तके! क्रमेण, वा नाद्यः स्मृतिग्रहणयोः युगपदुदयासम्भवात् । क्रमविशिष्टयोर्द्वयोः प्रवर्त्तकत्वमपि न युक्तम् पूर्व्वज्ञानस्य उत्तरज्ञानेन व्यवधानात् प्रवृत्तिहेतुत्वानुपपत्तेः इदमिति रजतमिति च विश्टङ्खलयोरपि ज्ञानयोः प्रवर्त्तकत्वापत्तेश्च । नाप्येकैकस्य प्रवर्त्तकत्वं व्यवहारस्य विशिष्टविषयकतया विशिष्टप्रवृत्तये विशिष्ट संसर्गग्रहस्यैव हेतुतायाः स्वीकार्य्यत्वादिति ।

अत्र ग्रहणस्मरणैरन्तर्य्येणोत्पन्ना प्रवर्त्तकत्वसम्भवेनासत्ख्यातिर्नाङ्गीकार्य्या अपि तु विशिष्टसंसर्गस्याख्यातिरेवेति अख्यातिवादिनामेकदेशिनः आहुः ।

तदपि वेदान्तिभिः निराकृतं यथा केयमख्यातिर्नाम किं ख्यात्यभावः ? उत अन्यार्थिनोऽन्यत्र प्रवृत्तिहेतुभूतविज्ञानम् ? अथाविविक्तानेकपदार्थज्ञानम् ? । आद्ये सुषुप्तावेव सर्व्वज्ञानाभावसत्त्वेन तत्रैव भ्रमः स्यात् नान्यत्र जाग्रत्स्वप्नयोः । द्वितीये झटिति बाधादालस्यादिना वा यत्र प्रवृत्तिर्न जाता तत्र भ्रान्तित्वं न स्यात् । तृतीयेऽप्यविविक्तत्वप्रतियोगिविविक्तत्वं नाम किम् भेदग्रहः ? उत अभेदाग्रहः ? आहोस्विदितरेतराभावभेदद्वित्वादिसंख्याविशिष्टज्ञानम् ? नाद्यः इदमिति रजतमिति च पुनरुक्तशब्दद्वयहेतुत्वेन सामान्यविशेषयोर्भेदग्रहे सत्यपि अविवेकासद्भावात् । न द्वितीयः उक्तरीत्या भेदस्य गृहीतत्वादेव तद्विरुद्धस्याभेदस्याग्रहे सति तदग्रहनिषेधरूपस्याविविक्तत्वस्य दुःसम्पादत्वात् । तृतीयेऽपि द्वित्वादिज्ञानमपेक्षितं किमव्यासज्यवृत्ति उतानुषङ्गिकमपि पर्य्याप्तम् आद्ये गामानय दण्डेनेत्यत्र गोदण्डयोरपि साक्षाद् द्वित्वाद्यप्रतीतेरविवेकः प्रसज्येत । द्वितीये तु पुरोवर्त्तिरजतयोरप्यानुषङ्गिक द्वित्वादिज्ञानस्य सद्भावेन दुष्परिहरणीयत्वात् । नन्वविवेको नाम असंसर्गाग्रहः स च प्रतीयमानयोरिदं रजतयोः संभवति इदंरजते असंसृष्टे इति प्रत्ययादर्शनात् इति चेत् तदापि किं ग्रहणस्मरणयोरेवासंसर्गो विवक्षितः ? उत ययोः कयोश्चित् ? आहोस्वित् संसर्गज्ञानरहितयोः ? आद्ये अहं मनुष्य इति भ्रमो न स्यात् उभयोरपि ग्रहणत्वात् । द्वितीये षण्डो गौः शुक्लः पट इत्यपि भ्रमः स्यात् असंसर्गप्रतीत्यभावात् । तृतीयेऽपि स एव दोषः स्यात् न हि तत्र संसर्गज्ञानं संभवति तद्विषयस्यैक्याभावात् ऐक्यस्य च तद्विषयत्वस्य प्रत्यभिज्ञायमानत्वात् । यदि गुणगुण्यादि संबन्ध एव तद्विषययोरैक्यमित्युच्यते तर्हि इदं रजतमित्यत्रापि सादृश्यतत्सम्बन्धस्तद्विषयद्वयस्यापि वक्तुं शक्यत्वेन संसर्गप्रत्ययोर्दुरुद्धरः । अथ तत्र नेदं रजतमित्यसंसर्ग तत्प्रत्ययेन बाधान्न संसर्गतत्प्रत्ययौ सम्भवतः । तर्हि त्वन्मतेऽपि गुणगुण्यादेरितरेतराभावज्ञानाख्योऽसंसर्गप्रत्ययोऽस्त्येवेति संसर्गतत्प्रत्यययोरसम्भवात् भ्रमत्वापत्तिस्तदवस्था तस्मान्नासंसर्गाग्रहोऽप्यविवेकः ।

अस्तु तर्हि प्रकृतेऽपि संस्कारजन्यैव रजतस्मृतिरिति चेत् न रजतस्य पुरोऽवस्थितत्वेन प्रतिभासादित्युक्तोत्तरत्वात् न च पुरोऽवस्थितत्वमविवेककृतमिति वक्तुं शक्यम् । अविवेकस्य भ्रमं प्रत्यप्रयोजकत्वात् । तथा हि किं गृह्यमाणयोरविवेकः ? किं वा गृह्यमाणस्मर्य्यमाणयोः ? किं वा स्मर्य्यमाणयोः ? नाद्यः स्वप्नदशायामात्मव्यतिरिक्तस्य कस्याप्यग्रहणेन द्वयोर्गृह्यमाणयोरभावे तदविवेकस्य भ्रमप्रयोजकस्याप्यभावेन भ्रमाभावप्रसङ्गात् । न द्वितीयः स्वप्ने गृह्यमाणेनात्मना स्मर्य्यमाणस्य नीलादेरविवेके सति अहं नीलमिति प्रतिभासप्रसङ्गात् । तृतीये तु परोक्षमेव सर्व्वं भ्रान्ताववभासेत, सर्व्वस्यापि स्मर्य्यमाणत्वात् एवं च सति प्रकृतस्य पुरोऽवस्थितरजतज्ञानस्य स्मृतित्वानुमाने परोक्षावभासित्वोपाधिर्द्रष्टव्यः । याथार्थ्यानुमानस्य चायं प्रतिप्रयोगः । विमताः प्रत्यया न यथार्थाः बाध्यमानत्वाद्भ्रान्तिव्यवहारवदिति तस्मात् बोधद्वैराग्र्यदुराग्रहं परित्यज्य तृतीयं भ्रान्तिज्ञानमङ्गीकर्त्तव्यम् ।

अन्यथाख्यातिरिति नैयायिकादयः। ते ह्येवमुररीचक्रुः ननु तर्हि मा भूदख्यातिः अस्त्वन्यथाख्यातिः । तथा हि देशकालान्तरगतं हि रजतं शुक्तिसंप्रयुक्तेन दोषोपहितेनेन्द्रियेण शुक्त्यात्मना गृह्यते न चैवमननुभूतस्यापि ग्रहणप्रसङ्गः । सादृश्यादेर्नियामकत्वादिति” ।

तदेतदसत् किं ज्ञानेऽन्यथात्वं ? किं वा ? फले उत वस्तुनि ? । नाद्यः रजताकारं ज्ञानं शुक्तिमालम्बते इति ज्ञानेऽन्यथात्वं वाच्यम् । तत्र शुक्तेरालम्बनत्वं नाम किं ज्ञानं प्रति स्वाकारसमर्पकत्वम् उत ज्ञानप्रयुक्तव्यवहारविषयत्वम् नाद्यः । रजताकारग्रस्तं ज्ञानं प्रति शुक्तेः स्वाकारसमर्पणासम्भवात् । न द्वितीयः व्याघ्रादिदर्शन